पितृदैवे तथा सौम्ये धान्यच्छेदं मृगोदये ।”
अथ धान्यच्छेदप्रकारः ।
“मदर्नौ माषमुद्गौ च यवधान्ये सकार्त्तिके ।
छिन्द्यात्तिलञ्च निष्पन्नमेतत् पाराशरं मतम् ॥”
पराशरः ।
“न मुष्टिग्रहणं कुर्य्यात् कदाचिद्वटपौषयोः ।
ईशाने लवनं कुर्य्यात् सार्द्धमुष्टिद्वयं शुचिः ॥
पौषे पुष्ये शुभाहे वा पूजयित्वेष्टदेवताम् ।
शस्यविघ्नप्रशान्त्यर्थं क्षेत्रे वाहकभोजनम् ॥”
बौधायनः ।
“रथाश्वगजधान्यानां गवां चैव रजः शुभम् ।
अथाशस्तं समूहिन्याः श्वाजाविखरवाय-
साम् ॥”
समूहिनी संमार्ज्जनी ॥ * ॥ कृत्यचिन्तामणौ
मेधिरोपणम् ।
वटश्च सप्तपर्णश्च गम्भारी शाल्मली तथा ।
औडुम्बरी तथा धात्री या चान्या क्षीर-
धारिणी ।
स्त्रीनाम्नी कर्षकैर्नित्यं मेधिः कार्य्या फलप्रदा ॥”
बीजसञ्चयदिनादि तच्छब्दे द्रष्टव्यम् ॥ * ॥ * ॥
अथ प्रयोगः ।
पौर्णमास्यन्तचैत्रीयकृष्णपञ्चम्यां पृथ्वी रजस्वला
तां दिनत्रयमेकस्मिन् पर्व्वताकारे उच्चप्रदेशे
सधवाः स्त्रियः प्रपूजयेयुरष्टम्यां तां स्नापयित्वा
ताः पूजयेयुः । ततः शुभदिने बीजवपनदिने
वा सर्व्वौषधिगन्धबीजरत्नफलश्वेतसर्षपैः पृथ्वीं
स्नापयित्वा गन्धादिभिः पूजयेत् । नैवेद्यशेषञ्च
पश्चाद्भोक्तव्यम् ॥*॥ अथ हलप्रवाहदिने बीज-
वपनदिने च कृतस्नानादिराचान्तो गर्त्तं क्षेत्रे
कृत्वा जलेनापूर्य्य तत्र प्रजापतिं सूर्य्यादिनव-
ग्रहान् पृथ्वीञ्च पूजयेत् ।
“हिरण्यगर्भे वसुधे शेषस्योपरिशायिनि ।
वसाम्यहं तव पृष्ठे गृहाणार्घ्यं धरित्रि मे ॥”
इति मन्त्रेण क्षीरेणार्घ्यं दद्यात् । ऐशान्यां
पुष्पनैवेद्यैः प्रणवादिनमोऽन्तेन ब्रह्मणे विष्णवे ।
नमस्ते बहुरूपाय विष्णवे परमात्मने स्वाहा ॥
इत्यनेन त्रिः पूजयेत् । रुद्राय कश्यपाय सुरभ्यै
इन्द्राय । तदर्घ्यमन्त्रस्तु ।
“शक्रः सुरपतिः श्रेष्ठो वज्रहस्तो महाबलः ।
शतयज्ञाधिपो देव तुभ्यमिन्द्राय वै नमः ॥”
प्रचेतसे पर्ज्जन्याय शेषाय चन्द्राय अर्काय वक्रय
बलदेवाय हलाय भूमये वृषभाय र. गाय लक्ष्म-
णाय जानक्यै सीतायै युगाय गगनाय इति
द्वाविंशतिं पूजयेत् क्षेत्रपालमग्निं द्विजञ्च पूज-
येत् । अग्निं प्रदक्षिणीकृत्य ब्राह्मणाय दक्षिणां
दद्यात् । आम्रपल्लवौदनदधीनि गर्त्ते निःक्षिप्य
मृत्तिकाभिः पूरयेत् । कृष्णौ वृषौ नवनीतै-
र्घृतैर्वा सुवर्णशृङ्गयोर्निर्लिम्पेत् । हलप्रवाह-
कान् गन्धादिना भूषयित्वा हलं माल्यादिभिः
पूजयित्वा दधिघृतमधुभिः फालाग्रं प्रलिप्य
हेम्ना फालाग्रं सर्षयित्वा कर्षयेत् । वस्त्रिन्द्र-
ग्रथरामिन्दपराशरजलभदान् स्मरेत् । एका
तिस्रः पञ्च वा रेखा हलेन कार्य्याः । भग्नशृङ्ग-
खुरलाङ्गूलाः कपिलाश्च वृषा न योक्तव्याः ।
हलप्रवाहकाश्च समर्थाः कर्त्तव्याः । हलानि
नवानि दृढानि कर्त्तव्यानि । वृषभयुद्धादिकं न
शुभदं वृषभाणां नर्द्दनेन चतुर्गुणं शस्य मूत्र-
पुरीषोत्सर्गे तथा ॥ * ॥ बीजवपने त्विदमधि-
कम् । सुवर्णजलसंयुक्तं बीजमुष्टित्रयं इन्द्रं
ध्यायन् स्वयं प्राजापत्येन तीर्थेन वपेत् । उभय-
त्रैव प्राङ्मुखः जलपूर्णं कलसं गृहीत्वा ।
“त्वं वै वसुन्धरे सीते बहुपुष्पफलप्रदे ।
नमस्ते मे शुभं नित्यं कृषिं मेधां शुभे कुरु ॥
रोहन्तु सर्व्वशस्यानि काले देवः प्रवर्षतु ।
कर्षकास्तु भवन्त्वग्र्या धान्येन च धनेन च
स्वाहेति प्रार्थयेदिति ॥”
इति ज्योतिस्तत्त्वम् ॥ * ॥
अपि च ।
“अमावस्यां पितृश्राद्धे अम्बुवाचीदिने तथा ।
लाङ्गलेन क्षतं चेत्वं पृथिवी कम्पते सदा ॥”
इति कर्म्मलोचनम् ॥ * ॥
स्मृतिसागरसारे गोभिलः ।
“हलैर्व्वा शकटैर्व्वापि वाहयेत् यो वृषं स्वयम् ।
प्राजापत्यद्वयं कुर्य्यात् द्विगुणं योषितां गवाम् ॥
वृषभन्तु समुत्सृष्टं कपिलां वापि कामतः ॥
योजयित्वा हले कुर्य्यात् व्रतं चान्द्रायणद्वयम् ॥”
इति तिथ्यादितत्त्वम् ॥
हलद्दी, स्त्री, हरिद्रा । इति राजनिर्घण्टः ॥
हलधरः, पुं, ( धरतीति । धृ+अच् । हलस्य
धरः । ) बलदेवः । यथा,—
“नीलाम्बरो हलधरो हलध्वजालभृत् बलः ॥”
इति शब्दरत्नावली ॥
(यथा च महाभारते । १ । २२० । ७ ।
“ततो हलधरः क्षीवो रेवतीसहितः प्रभुः ।
अनुगम्यमानो गन्धर्व्वैरचरत्तत्र भारत ! ॥”)
हालिकः । यथा, ज्योतिस्तत्त्वे ।
“सालङ्कारो हलधरः स्रग्भिश्च पूजितं हलम् ॥”
हलभूतिः, स्त्री, (हलसाध्या भूतिः ।) कृषिकर्म्म ।
यथा,—
“अथ सेवा श्ववृत्तिः स्यात् स्त्रियां कृषिश्च
कर्षणम् ।
कर्षोऽस्त्रतञ्च प्रकृतं हलभूतिर्म्महाधनम् ॥”
इति शब्दरत्नावली ॥”
हलभृत्, पुं,(हलं बिभर्त्तीति । भृ+क्विप् । हलस्य
भृदिति वा । बलदेवः । इति त्रिकाण्डशेषः ॥
( यथा, मेघदूते । ६१ ।
“अंसन्यस्ते सति हलभृतो मेचके वाससीव ॥”)
हलभृतिः, पुं, ( हलेन भृतिर्भरणमस्य । ) मुनि-
विशेषः । तत्पर्य्यायः । उपवर्षः २ कृतकोटिः ३
अयाचितः ४ । इति त्रिकाण्डशेषः ॥ ( हलस्य
हलेन वा भृतिः । ) कृषिकर्म्म च ॥
हलराध्रं, क्ली, बाहुल्यम् । इति राजनिर्घण्टः ॥
हला, व्य, नाट्योक्तौ सखीं प्रत्याह्वानम् । इत्य-
मरः । १ । ७ । १५ ॥
हला, स्त्री, सखी, । इति जटाधरः ॥ मद्यम् ।
पृथिवी । जलम् । इत्यनेकार्थकोषः ॥
हलायुधः, पुं, ( हलमायुधं यस्य । ) बलदेवः ।
इत्यमरः । १ । १ । २४ ॥ ( यथा, महाभारते ।
१ । २२१ । २३ ।
‘ततस्ते तद्वचः श्रुत्वा याह्यरूपं हलायुधात् ।
तूष्णींभूतास्ततः सर्व्वे साधु साध्विति चाब्रुवन् ॥”)
हलाहः, पुं, चित्रिताश्वः । इति हेमचन्द्रः ॥
हलाहलः, पुं, ( हलमिव आ समन्तात् सर्व्वाङ्गेषु
हलति कर्षतीति । आ+हल+अच् । ) विष-
भेदः । यथा,—
“क्ष्मी कञ्चुकनिर्म्मोकौ क्ष्वेड़स्तु गरलं विषम् ।
पुंसि क्लीवे च काकोलकालकूटहलाहलाः ॥”
इत्यमरः । १ । ८ । १० ॥
हलमिव आ समन्तात् हलति विलिखति
हलाहलः । हलज विलेखे अन् स्वार्थे वा
हालाहलश्च । निपातनात् ललोपे हाहलश्च ।
“हालाहलं हालहलं हाहलञ्च हलाहलम् ॥”
इति रुद्रः ॥
एते काकोलादयस्त्रयः पुंसि क्लीवे चेत्यन्वयः ।
केचित्तु क्ष्वेड़भेदा इति पुंस्त्वे वक्ष्यमाणत्वात्
पुंसि क्लीवे चेत्यस्य विषमित्यनेन सम्बन्धः ।
इत्याहुः । तत्रातिह्रस्वम् ।
“काकोलमुग्रतेजः स्यात् कृष्णच्छवि महा-
विषम् ।”
इति वैद्यकम् ।
“तत् कालकूटं विषमुग्रतेजः
कण्ठे धृतं पर्व्वतराजकन्ये ॥”
इति व्यासः ॥
हालाहलं विषमिव प्रगुणं तदेव इति वामनः ॥
“मधु तिष्ठति वाचि योषितां हृदये हलाहलं
महद्विषम् ।
अतएव निपीयतेऽधरो हृदयं मुष्टिभिरेव
ताड्यते ॥”
इति कुलचरितेऽश्वघोषः । इति भरतः ॥
( मूलजविषभेदः ।
“सङ्कोचं मर्कटं शृङ्गिविषं हलाहलन्तथा ।
एवमादीनि चान्यानि मूलजानि स्थिराणि च ॥”
इति चरके चिकित्सास्थाने २५ अध्याये ॥ )
हलाहलः, पुं, (हलाहलोऽस्यास्तीति । ) अच् । )
ब्रह्मसर्पः । अञ्जनः । इति मेदिनी ॥ बुद्धविशेषः ।
इति त्रिकाण्डशेषः ॥
हलिः, पुं, (हलति कर्षति भूमिमिति । हल+
“सर्व्वधातुभ्य इन् ।” उणा० ४ । ११७ । इति
इन् बृहद्धलम् । इति शब्दरत्नावली ॥
पर्य्यायः । जित्या २ । इति हेमचन्द्रः ॥
हलिनी, स्त्री, (हलमिव आकारोऽस्त्यस्या इति ।
इनिः । ङीप् ।) लाङ्गलिकीवृक्षः । विषलाङ्गला
इति भाषा इति रत्नमाला ॥ ( पर्य्यायोऽस्य
यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ।
“कलिहारी तु हलिनी लाङ्गली शक्रपुष्प्यपि ।
विशल्याग्निशिखानन्ता वह्निवक्त्रा च गर्भनुत ॥”